ॐ

# मुकुन्दमाला **mukundamālā**

"Garland of Hymns to Mukunda"

रामुलु गजवाड *Rāmulu Gajavāḍa*

वन्दे मुकुन्दमरविन्ददलायताक्षं

कुन्देन्दुशङ्खदशनं शिशुगोपवेषम्।

इन्द्रादिदेवगणवन्दितपादपीठं

वृन्दावनालयमहं वसुदेवसूनुम्॥

*vande mukunda-maravinda-dalāyatākṣaṁ*
*kundendu-śaṅkhada-śanaṁ śiśu-gopa-veṣam*।
*indrādideva-gaṇa-vandita-pāda-pīṭhaṁ*
*vṛndāvanālayamahaṁ vasudeva-sūnum* ॥

घुष्यते यस्यनगरे रङ्गयात्रा दिनेदिने

तमहं शिरसावन्दे राजानं कुलशेखरम्।

*ghuṣyate yasya nagare raṅgayātrā dinedine*
*tamahaṁ śirasāvande rājānaṁ kulaśekharam*।

श्री वल्लभेति वरदेति दयापरेति

भक्तप्रियेति भवलुण्ठन कोविदेति।

नाथेति नागशयनेति जगन्निवासेति

आलाप(पि)नं प्रतिपदं कुरुमे(मां) मुकुन्द॥ १

*śrī vallabheti varadeti dayāpareti*
*bhakta-priyeti bhavaluṇṭhana kovideti* ।
*nātheti nāga-śayaneti jagannivāseti*
*ālāpa(pi)naṁ prati-padaṁ kurume(māṁ) mukunda* ॥ **1**

जयतु जयतु देवो देवकीनन्दनोऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघश्यामलः कोमलाङ्गो
जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ २ ॥

*jayatu jayatu devo devakī-nandano'yaṁ*
*jayatu jayatu kṛṣṇo vṛṣṇi-vaṁśa-pradīpaḥ*।
*jayatu jayatu megha-śyāmalaḥ komalāṅgo*
*jayatu jayatu pṛthvī-bhāranāśo mukundaḥ* ।। 2।।

मुकुन्द मूर्ध्ना प्रणिपत्य याचे ।
भवन्तमेकान्तमियन्तमर्थम् ।
अविस्मृतिस्त्वच्चरणारविन्दे
भवे भवे मेऽस्तु भवत्प्रसादात् ॥३ ॥

*mukunda mūrdhnā praṇipatya yāce*।
*bhavantamekāntamiyantamartham*।
*avismṛtistvaccaraṇāravinde*
*bhave bhave me'stu bhavatprasādāt* ।।3।।

नाहं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापिनेतुम्।
रम्यां रामां मृदुतनुलतां नदने नापि रन्तुम्
भावे भावे हृदयभवने भावयेयं भवन्तम्॥ ४॥

*nāhaṁ vande tava caraṇayor-dvandvam-advandva-hetoḥ*
*kumbhī-pākaṁ gurumapi hare nārakaṁ nāpi-netum*।
*ramyāṁ rāmāṁ mṛdu-tanu-latāṁ nadane nāpi rantum*
*bhāve bhāve hṛdaya-bhavane bhāvayeyaṁ bhavantam*।। 4।।

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद्भव्यं भवतु भगवन् पूर्वकर्मानुरूपम्।
एतत्प्रार्थ्यं मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु॥ ५॥

*nāsthā dharme na vasunicaye naiva kāmopabhoge*
*yadyadbhavyaṁ bhavatu bhagavan pūrvakarmānurūpam*।
*etat-prārthyaṁ mama bahu-mataṁ janma-janmāntare'pi*
*tvat-pādāmbho-ruha-yugagatā niścalā bhaktir-astu* ।। 5।।

दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक प्रकामम्।
अवधीरितशारदारविन्दौ

चरणौ ते मरणेऽपि चिन्तयामि ॥ ६ ॥

*divi vā bhuvi vā mamāstu vāso*
*narake vā narakāntaka prakāmam*|
*avadhīritaśāradāravindau*
*caraṇau te maraṇe'pi cintayāmi*|| 6||

कृष्ण त्वदीयपदपङ्कजरान्तः

अद्यैव मे विशतु मानसराजहंसः ।

प्राणप्रयाणसमये कफवातपित्तैः

कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ७ ॥

*kṛṣṇa tvadīyapadapaṅkajarāntaḥ*
*adyaiva me viśatu mānasarājahaṁsaḥ*|
*prāṇaprayāṇasamaye kaphavātapittaiḥ*
*kaṇṭhāvarodhanavidhau smaraṇaṁ kutaste* ||7 ||

चिन्तयामि हरिमेव सन्ततं

मन्दमन्दहसिताननामुबुजम् ।

नन्दगोपतनयं परात्परं

नारदादिमुनिबृन्द वन्दितम् ॥ ८ ॥

*cintayāmi harimeva santataṁ*
*mandamandahasitānanāmubujam*|
*nandagopatanayaṁ parātparaṁ*
*nāradādi-munibṛnda vanditam* || 8 ||

करचरणसरोजे कान्तिमन्नेत्रमीने

श्रममुषि भुजवीचिव्याकुलेऽगाधमार्गे ।

हरिसरसि विघायापीय तेजोजलौघं

भवमरुपरिखिन्नः खेदमद्यत्यजामि ॥ ९

*karacaraṇasaroje kāntimannetramīne*
*śramamuṣi bhujavīcivyākule'gādhamārge*|
*harisarasi vighāyāpīya tejojalaughaṁ*
*bhavamaruparikhinnaḥ khedamadyatyajāmi* ||9||

सरसिजनयने सशङ्खचक्रे

मुरभिदि मा विरमस्व चित्त रन्तुम् ।

सुखकरमपरं न जातु जाने

हरिचरणस्मरणामृतेन तुल्यम् ॥ १०

*sarasijanayane saśaṅkhacakre*
*murabhidi mā viramasva citta rantum*|
*sukhakaramaparaṁ na jātu jāne*
*haricaraṇasmaraṇāmṛtena tulyam* || 10 ||

माभीर्मन्दमनो विचिन्त्य बहुधा  यामीश्चिरं यातनाः

नामी नः प्रभवन्ति पापरिपवः   स्वामी ननु श्रीधरः ।

आलसस्यं व्यपनीय भक्तिसुलभं   ध्यायस्व नारायणं

लोकस्य व्यसनापनोदनकरो   दासस्य किं न क्षमः  ॥ ११ ॥

*mābhīrmandamano vicintya bahudhā*
*yāmīściraṁ yātanāḥ*
*nāmī naḥ prabhavanti pāparipavaḥ*
*svāmī nanu śrīdharaḥ*|
*ālasasyaṁ vyapanīya bhaktisulabhaṁ*
*dhyāyasva nārāyaṇaṁ*
*lokasya vyasanāpanodanakaro*
*dāsasya kiṁ na kṣamaḥ* || **11**

भवजलधिगतानां द्वन्द्ववताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानाम्।
विषमविषयतोये मज्जतामप्लवानां
भवतु शरणमेको विष्णुपोतोनराणाम्॥ १२

*bhavajaladhigatānāṁ dvandvavatāhatānāṁ*
*sutaduhitṛkalatratrāṇabhārārditānām*|
*viṣamaviṣayatoye majjatāmaplavānāṁ*
*bhavatu śaraṇameko viṣṇupotonarāṇām*|| *12*

भवजलधिमगाधं दुस्तरं निस्तरेयं
कथ मह मिति चेतो मास्मगाः कातरत्वं।
सरसिजदृशि देवे तावकी बक्तिरेका
नरकभिदि निशण्णा तारयिष्यत्यवश्यम्॥ १३

*bhavajaladhi-magādhaṁ dustaraṁ nistareyaṁ*
*katha maha miti ceto māsmagāḥ kātaratvaṁ*|
*sarasijadṛśi deve tāvakī baktirekā*
*narakabhidi niśaṇṇā tārayiṣyatyavaśyam* || 13

तृष्णातोये मदनपवनोद्धूत मोहोर्मिमाले
दाराऽवर्तेतनयसहज ग्राहसङ्घाकुलेच ।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्
पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ १४ ॥

*tṛṣṇātoye madanapavanoddhūta mohormimāle*
*dārā'vartetanayasahaja grāhasaṅghākuleca*।
*saṁsārākhye mahati jaladhau majjatāṁ nastridhāman*
*pādāmbhoje varada bhavato bhaktināvaṁ prayaccha*।। **14**

माद्राक्षं क्षीणपुण्यान् क्षणमपि भवतो भक्तिहीनान् पादाब्जे
माश्रौषं श्राव्यबन्धं तवचरित मापासान्य दाख्यानजातम् ।
मास्मार्षंमाधवत्वामपि भुवनपतेचेतसा पह्नुवानान्
माभूवं त्वत्सपर्याव्यतिकर रहितो जन्मजन्मान्तरेऽपि ॥ १५

*mādrākṣaṁ kṣīṇapuṇyān kṣaṇamapi*
*bhavato bhaktihīnān pādābje*
*māśrauṣaṁ śrāvyabandhaṁ tavacarita*
*māpāsānya dākhyānajātam* ।
*māsmārṣammādhavatvāmapi*
*bhuvanapatecetasā pahnuvānān*
*mābhūvaṁ tvatsaparyāvyatikara*
rahito janmajanmäntare'pi || 15

जिह्वे कीर्तय केशवं मुररिपं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाऽच्युतकथाः श्रोत्रद्वय त्वं श्रुनु।
कृष्णं लोकय लोचनद्वय हरेर्गच्छाङ्घ्रियुग्माऽलयं
जिघ्रघ्राण मुकुन्द पादतुलसीं मूर्धन्नमाधोक्षजम्॥ १६ ॥

*jihve kīrtaya keśavaṁ muraripaṁ ceto bhaja śrīdharaṁ*
*pāṇidvandva samarcayā'cyutakathāḥ śrotradvaya tvaṁ śrunu*|
*kṛṣṇaṁ lokaya locanadvaya harergacchāṅghriyugmā'layaṁ*
*jighraghrāṇa mukundatulasīṁ mūrdhannamādhokṣajam* || 16 ||

हे लोकाः श्रुणुत प्रसूति मरण व्यादेश्चि कित्सामिमाम्
योगज्ञाः समुदाहरन्ति मुनयो  यां याज्ञवल्कादयः।
अन्तर्ज्योति रमेयमेकममृतं कृष्णाख्यमापीयतां
तत्पीतं परमौषधं वितनुते निर्वाणमात्यन्तिकम्॥ १७

***he lokāḥ śruṇuta prasūti maraṇa***
***vyādheści kitsāmimām***
***yogajñāḥ samudāharanti munayo***
***yāṁ yājñavalkādayaḥ***|
***antarjyoti rameyamekamamṛtaṁ***
***kṛṣṇākhyamāpīyatāṁ***
***tatpītaṁ paramauṣadhaṁ vitanute***
***nirvāṇamātyāntikam*** **|| 17**

हे मर्त्याः परमं हितं श्रुणुत वो वक्ष्यामि संक्षेपतः

संसारार्णव मापदूर्मिबहुलं सम्यक्प्रविश्य स्थिताः ।

नानाज्ञानमपास्य चेतसिनमोनारायणायेत्युमुं

मन्त्रं सप्रणवं प्रणामसहितं प्रावर्तयध्वं मुहुः ॥ १८

*he martyāḥ paramaṁ hitaṁ*
*śruṇuta vo vakṣyāmi saṅkṣepataḥ*
*saṁsārārṇava māpadūrmibahulaṁ*
*samyakpraviśya sthitāḥ* ।
*nānājñānamapāsya cetasi*
*namonārāyaṇāyetyumuṁ*
*mantraṁ sapraṇavaṁ praṇāmasahitaṁ*
*prāvartayadhvaṁ muhuḥ* ।। **18**

पृथ्वी रेणुरणुः प्रयांसि कणिकाः फल्गुस्फुलिङ्गोलघुः

तेजो निश्वसनं मरुत्तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।

क्षुद्रा रुद्रपितामहप्रभृतयः कीटास्समस्तास्सुराः ।

दृष्टे यत्र स तावको विजयते भूमावधूतावधिः ॥ १९

*pṛthvī reṇuraṇuḥ prayāṁsi kaṇikāḥ*
*phalgusphuliṅgolaghuḥ*।
*tejo niśvasanaṁ maruttanutaraṁ*
*randhraṁ susūkṣmaṁ nabhaḥ*।
*kṣudrā rudrapitāmahaprabhṛtayaḥ*
*kīṭāssamastāssurāḥ*।

*dṛṣṭe yatra sa tāvako vijayate*
*bhūmāvadhūtāvadhiḥ* || **19**

बद्धेनाञ्जलिना नतेन शिरसा गात्रैस्सरोमोद्गमैः
कण्ठेन स्वरगद्गदेन नयनोद्गीर्णबाष्पाम्बुना ।
नित्यं त्वच्चरणारविन्दयुगलध्यानामृतास्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं सम्पद्यतां जीवितम् ॥ २०

*baddhenāñjalinā natena śirasā gātraissaromodgamaiḥ*
*kaṇṭhena svaragadgadena nayanodgīrṇabāṣpāmbunā*|
*nityaṁ tvaccaraṇāravindayugaladhyānāmṛtasvādinām*
*asmākaṁ sarasīruhākṣa satataṁ sampadyatāṁ jīvitam*||

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्रकरुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रयगुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पाल परं जानामि न त्वां विना ॥ २१

*he gopālaka he kṛpājalanidhe he sindhukanyāpate*
*he kaṁsāntaka he gajendrakaruṇāpārīṇa he mādhava* ।
*he rāmānuja he jagattrayaguro he puṇḍarīkākṣa māṁ*
*he gopījananātha pāla paraṁ jānāmi na tvāṁ vinā* ॥**21**

भक्तापायभुजङ्गगारुडमणिः त्रैलोक्यरक्षामणिः
गोपीलोचनचातकाम्बुदमणिस्सौन्दर्यमुद्रामणिः ।
यःकान्तामणिरुक्मिणीघनकुचद्वन्द्वैकभूषामणिः
श्रेयो देवशिखामणिर्दिशतु नो गोपालचूडामणिः ॥ २२

*bhaktāpāyabhujaṅgagāruḍamaṇiḥ trailokyarakṣāmaṇiḥ*
*gopīlocanacātakāmbudamaṇissaundaryamudrāmaṇiḥ*|
*yaḥkāntāmaṇirukmiṇīghanakucadvandvaikabhūṣāmaṇiḥ*
*śreyo devaśikhāmaṇirdiśatu no gopālacūḍāmaṇiḥ*|| 22

**2**

शत्रुच्छेदैकमन्त्रं सकलमुपनिषद्वाक्यसम्पूज्यमन्त्रं
संसारोत्तारमन्त्रं समुपचिततमस्सङ्गनिर्याणमन्त्रम् ।
सर्वैश्वर्यैकमन्त्रं व्यसनभुजगसंदष्टसन्त्राणमन्त्रं
जिह्वे श्रीकृष्णमन्त्रं जप जप सततं जन्मसाफल्यमन्त्रम् ॥ २३

*śatrucchedaikamantraṁ sakalamupaniṣad-*
*vākyasampūjyamantraṁ*
*saṁsārottāramantraṁ samupacitatama-*
*ssaṅganiryāṇamantram*|
*sarvaiśvaryaikamantraṁ vyasanabhujaga*
*sandaṣṭasantrāṇamantraṁ*
*jihve śrīkṛṣṇamantraṁ japa japa satataṁ*
*janmasāphalyamnantram*|| 23

व्यामोहप्रशमौषधं मुनिमनोवृत्तिप्रवृत्त्यौषधं
दैत्येन्द्रार्तिकरौषदं त्रिभुवनीसञ्जीवनैकौषधम् ।
भक्तान्तर्हितौषधं भवभयप्रध्वंसनैकौषधं
श्रेयःप्राप्तिकरौषधं पिब मनश्श्रीकृष्णदिव्यौषधम् ॥ २४

*vyāmohapraśamauṣadhaṁ*
*munimanovṛttipravṛttyauṣadhaṁ*
*daityendrārtikarauṣadaṁ*
*tribhuvanīsañjīvanaikauṣadham*।
*bhaktāntahitauṣadhaṁ*
*bhavabhayapradhvaṁsanaikauṣadhaṁ*
*śreyaḥprāptikarauṣadhaṁ piba*
*manaśśrīkṛṣṇadivyauṣadham*।। 24

आम्नायाभ्सनान्यरण्यरुदितं वेदव्रतान्यन्वहं
मेदश्छेदफलानि पूर्तविधयस्सर्वे हुतं भस्मनि ।
तीर्थानामवगाहनानि च गजस्नानं विना यत्पद
द्वन्द्वाम्भोरुहसंस्मृतिर्विजयते देवस्य नारायणः ॥ २५

*āmnāyābhsanānyaraṇyaruditaṁ vedavratāānyanvahaṁ*
*medaśchedaphalāni pūrtavidhayassarve hutaṁ bhasmani*।
*tīrthānāmavagāhanāni ca gajasnānaṁ vinā yatpada*
*dvandvārmbhoruhasaṁsmṛtirvijayate devasya nārāyaṇaḥ*।।

श्रीमन्नाम प्रोच्य नारायणाख्यम्
के न प्रापुर्वाञ्छितं पापिनोऽपि ।
हा न पूर्वं वाक्प्रावृत्ता न तस्मिन्
तेन प्राप्तं गर्भवासादिदुःखम् ॥ २६

*śrīmannāma procya nārāyaṇākhyam*
*ke na prāpurvāñchitaṁ pāpino'pi*|
*hā na pūrvaṁ vākprāvṛttā na tasmin*
*tena prāptaṁ garbhavāsādiduḥkham* || 26

मज्जन्मनः फलमिदं मधुकैटभारे
मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य-
-भृत्यस्यभृत्य इति मां स्मर लोकनाथ ॥ २७

*majjanmanaḥ phalamidaṁ madhukaiṭabhāre*
*matprārthanīya madanugraha eṣa eva* |
*tvadbhṛtyabhṛtyaparicārakabhṛtyabhṛtya-*
*-bhṛtyasyabhṛtya iti māṁ smara lokanātha* || 27

नाथे नः पुरुषोत्तमेत्रिजगता मेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं किञ्चित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरं अहो मूका वराका वयम् ॥ २८

*nāthe naḥ puruṣottametrijagatā mekādhipe cetasā*
*sevye svasya padasya dātari sure nārāyaṇe tiṣṭhati* |
*yaṁ kiñcitpuruṣādhamaṁ katipayagrāmeśamalpārthadaṁ*
*sevāyai mṛgayāmahe naraṁ aho mūkā varākā vayam* || 28

मदन परिहर स्थितिं मदीये

मनसि मुकुन्द पदारविन्द धाम्नि।

हरनयनकृशानुना कृशोसि

स्मरसि न चक्र पराक्रमं मुरारेः॥ २९

*madana parihara sthitiṁ madīye*
*manasi mukunda padāravinda dhāmni*|
*haranayanakṛśānunā kṛśosi*
*smarasi na cakra parākramaṁ murāreḥ*|| **29**

तत्त्वं ब्रुवाणानि परं परस्मात्

मधु क्षरन्तीव सतां फलानि।

प्रावर्तय प्राञ्जलिरस्मि जिह्वे

नमानि नारायणगोचराणि॥ ३०

*tattvaṁ bruvāṇāni paraṁ parasmāt*
*madhu kṣarantīva satāṁ phalāni*|
*prāvrataya prāñjalirasmi jihve*
*namāni nārāyaṇagocarāṇi*|| **30**

इदं शरीरं परिणामपेशलं

पतत्यवश्यं श्लथसन्धि जर्जरम्।

किमौषधैः क्लिश्यसि मूढ दुर्मते

निरामयं कृष्णरसायनं पिब॥ ३१

*idaṁ śarīraṁ pariṇāmapeśalaṁ*
*patatyavaśyaṁ ślthasandhi jarjaram* |
*kimauṣadhaiḥ kliśyasi mūḍha durmate*
*nirāmayaṁ kṛṣṇarasāyanaṁ piba* || **31**

दारा वाराकरवरसुता ते, तनूजो विरिञ्चिः
स्तोता वेदस्तव, सुरगणो भृत्यवर्गः  प्रसादः।
मुक्ति,र्माया जगदविकलं, तावकी देवकी ते
माता, मित्रं बलरिपुसुत, स्त्वय्यतोऽन्यं न जाने॥ ३२

*dārā vārākaravarasutā te, tanūjo viriñciḥ*
*stotā vedastava, suragaṇo bhṛtyavargaḥ  prasādaḥ*|
*mukti,rmāyā jagadavikalaṁ, tāvakī devakī te*
*mātā,mitraṁ balaripusuta,stvayyato'nyaṁ na jāne*||32

कृष्णो रक्षति नो जगत्रय गुरुः कृष्णं नमस्याम्यहम्
कृष्णेनामरशत्रवो विनिहताः कृष्णाय तस्मै नमः।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहम्
कृष्णे तिष्ठति सर्वमेतदखिलं हे कृष्ण रक्षस्व माम्॥३३

*kṛṣṇo rakṣati no jagatraya guruḥ kṛṣṇaṁ namasyāmyaham*
*kṛṣṇenāmaraśatravo vinihatāḥ kṛṣṇāya tasmai namaḥ*|
*kṛṣṇādeva samutthitaṁ jagadidaṁ kṛṣṇasya dāso'smyahaṁ*
*kṛṣṇe tiṣṭhati sarvametadakhilaṁ he kṛṣṇa rakṣasva mām*||

तत्त्वं प्रसीद भगवन् कुरुमय्यनाथे
विष्णो कृपां परमकारुणिकः किल त्वम्।
संसारसागरनिमग्नमनन्त दीनं
उद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥ ३४

*tattvaṁ prasīda bhagavan kurumayyanāthe*
*viṣṇo kṛpāṁ paramakāruṇikaḥ kila tvam*।
*saṁsārasāgaranimagnamananta dīnaṁ*
*uddhartumarhasi hare puruṣottamo'si* ।। **34**

नमामि नारायणपादपङ्कजं
करोमि नारायणपूजनं सदा।
वदामि नारायणनाम निर्मलं
स्मरामि नारायण तत्त्वमव्ययम्॥ ३५

*namāmi nārāyaṇapādapaṅkajaṁ*
*karomi nārāyaṇapūjanaṁ sadā*।
*vadāmi nārāyaṇanāma nirmalaṁ*
*smarāmi nārāyaṇa tattvamavyayam*।। **35**

श्रीनाथ नारायण वासुदेव
श्रीकृष्ण भक्तप्रिय चक्रपाणे।
श्रीपद्मनाभाच्युत कैटभारे
श्रीराम पद्माक्ष हरे मुरारे॥ ३६

*śrīnātha nārāyaṇa vāsudeva*
*śrīkṛṣṇa bhaktapriya cakrapāṇe*|
*śrīpadmanābhācyuta kaiṭabhāre*
*śrīrāma padmākṣa hare murāre* || 36

अनन्त वैकुण्ठ मुकुन्द कृष्ण
गोविन्द दामोदर माधवेति ।
वक्तुं समथोऽपि नवक्ति कश्चित्
अहो! जनानां व्यसनाभिमुख्यम् ॥ ३७

*ananta vaikuṇṭha mukunda kṛṣṇa*
*govinda dāmodara mādhaveti*|
*vaktuṁ samatho'pi navakti kaścit*
*aho! janānāṁ vyasanābhimukhyam*|| *37*

ध्यायन्ति ये विष्णुमनन्त मव्ययं
हृत्पद्म मध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं
ते यान्ति सिद्धिं परमाञ्च वैष्णवीम् ॥ ३८

*dhyāyanti ye viṣṇumananta mavyayaṁ*
*hṛtpadma madhye satataṁ vyavasthitam* |
*samāhitānāṁ satatābhayapradaṁ*
*te yānti siddhiṁ paramāñca vaiṣṇavīm* || 38

क्षीरसागरतरङ्ग शीकराऽऽसार तारकित चारुमूर्तये ।
भोगिभोगशयनीयशायिने माधवाय मधुविद्विषे नमः ॥ ३९

*kṣīrasāgarataraṅga śīkarā''sāra tārakita cārumūrtaye*।
*bhogibhogaśayanīyaśāyine mādhavāya madhuvidviṣe namaḥ*।। 39

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ
मित्रे द्विजन्मवर पद्मशरावभूताम्।
तेनाम्बुजाक्ष चरणाम्बुज षट्पदेन
राज्ञा कृताकृतिरियं कुलशेखरेण ॥ ४०

*yasya priyau śrutidharau kavilokavīrau*
*mitre dvijanmavara padmaśarāvabhūtām*।
*tenāmbujākṣa caraṇāmbuja ṣaṭpadena*
*rājñā kṛtākṛtiriyaṁ kulaśekhareṇa*।। **40**

घुष्यते यस्यनगरे रङ्गयात्रा दिनेदिने
तमहं शिरसावन्दे राजानं कुलशेखरम्।

*ghuṣyate yasya nagare raṅgayātrā dinedine*
*tamahaṁ śirasāvande rājānaṁ kulaśekharam*।

यदक्षर पदभ्रष्टं मात्राहीनन्तु यद्भवेत्।
तत्सर्वं क्षम्यतां देव नारायण नमोस्तुते ॥

*yadakṣara padabhraṣṭaṁ mātrāhīnantu yadbhavet* ।
*tatsarvaṁ kṣamyatāṁ deva nārāyaṇa namostute* ।।

कायेन वाचा मनसेन्द्रयैर्वा
बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत् सकलं परस्मै
नारायणेति समर्पयामि ॥

*kāyena vācā manasendrayairvā*
*buddhayātmanā vā prakṛteḥ svabhāvāt*।
*karomi yadyat sakalaṁ parasmai*
*nārāyaṇeti samarpayāmi* ।।

सर्वं श्रीकृष्णार्पणमस्तु *sarvaṁ śrīkṛṣṇārpaṇamastu*
**May all this be offered Lord śrīkṛṣṇa**

ॐ अस्मद्गुरुभ्यो नमः asmadgurubhyo namaḥ
**Salutations to the tradition of all our Gurus**

सम्पूर्णम् *sampūrṇam*